This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः श्रीसरस्वत्यै नमः विश्वेश्वरं नमस्कृत्य खंडदेवः सतां मुदे तनुते तत्प्रसादेन सं-
क्षिप्तां भाट्टदीपिकां १ आम्नायस्य वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स
एवैनं भूतिं गमयतीत्याद्यर्थवादानां विधिप्रतिषेधवद्वेदत्वकर्तृस्मरणाभावादपौरुषेयत्वे सर्वाधि-
करणेन सिद्धे संप्रतिपन्ने तद्वदेव धर्माधर्मयोः प्रामाण्यमस्ति न वेति विचार्यते तत्र विधिप्रतिषेधवा-
क्यानां स्वशक्त्या साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविषयकविधिप्रतिषेधयोः प्रतिपाद-
ना दर्थाश्च विधिप्रतिषेधविषययागादेरिष्टानिष्टसाधनत्वाक्षेपाद्युक्तं तयोरिष्टानिष्टसाधनरूपधर्माधर्मप्र-
माजनकत्वं अर्थवादानां तु शक्त्या सदसद्रूपसिद्धार्थबोधकत्वान्न धर्माधर्मयोः प्रामाण्यसंभवः । न च शक्त्या
तदसंभवेऽपि लक्षणाध्याहारादिना तत्प्रतिपादनं यथाश्रुतार्थप्रतिपादनेनैवोपपत्तौ अन्यथानुपपत्त्यभा-
वेन तदसंभवात् न च तात्पर्यानुपपत्त्या तत्कल्पनं तात्पर्यग्राहकाभावेन तस्याप्यसंभवात् नहि प्र-
वृत्तः प्रमाणमात्रं वा प्रयोजनवद्विषयमेवेत्येवं नियमे प्रमाणमस्ति येन स एव तात्पर्यग्राहकः शंक्येत निः
प्रयोजनानामपि बहुशो दर्शनेन व्यभिचारात् न च स्वाध्यायोऽध्येतव्य इति स्वाध्यायविधिरेवार्थज्ञानोद्दे-
शेनाध्ययनं विदधन्निःप्रयोजनार्थज्ञानस्य भाव्यत्वानुपपत्तेरर्थस्य प्रयोजनवत्त्वमाक्षिपतीति वा-
च्यं अर्थज्ञानजनकत्वेनाध्ययनस्य लोकसिद्धत्वेनाविधेयत्वात् नियमस्य चार्थज्ञानेनुयोगात्
अव्यभिचरितक्रतुसंबंधाभावेन क्रतुयावदुपयोगकल्पनानुपपत्तेश्च न विधेयत्वं अतः स्वाध्यायविधि १

K K S U LIBRARY
RAMTEK
441 106
M-1577
Dist. Nagpur

Acc. No. ~~1897~~ M-1577
Title - भाट्टदीपिका.
Author - खण्डदेव
Sub~~Date~~ - मीमांसा.
Date - ?
folio - 10
Xerox - 19

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्वर्गाद्यर्थमेवाध्ययनं विधीयते लोकतः प्रवृत्त्यंगीकारेणयथाश्रुतार्थज्ञानार्थं वा अध्ययनमेव वा भावना
यां भाव्यमस्तु. नचैवमिष्टभाव्यकत्वाभावात्प्रवृत्त्यनुपपत्तिः अनधीयानाव्रात्या भवंतीति वचनेनाकरणे प्रत्य
वायबोधनेनापि प्रवृत्तिसिद्धेः अतस्तस्य वेदत्वावच्छेदेन प्रयोजनवद्विषयत्वानाक्षेपकत्वान्नार्थवादेषु तद्बलेन
लक्षणादिसिद्धिरित्यप्रमाणमर्थवादाधर्माधर्मयोरितिप्राप्तेऽभिधीयते नस्वाध्यायविधिः स्वर्गाद्यर्थमध्ययनं
विधत्ते दृष्टसंभवत्यदृष्टस्यान्याय्यत्वात् नापि यथाश्रुतार्थज्ञानार्थं तथात्वे व्रात्यताबोधकवाक्येनाध्य
यनस्यावश्यकत्वाद्गृहीतपदपदार्थसंगतिकस्यस्थाणुरयंभारहारः किलायमधीत्यवेदं न विजानातियोर्थं
मित्यादिवचनाच्चज्ञानस्याप्यावश्यकत्वेन यथाश्रुतार्थज्ञानस्यानुषंगिकतयापिसिद्धेः स्वाध्यायविधि
वैयर्थ्यप्रसंगात् एतेनाध्ययनभाव्यकत्वपक्षोपि निरस्तः अतोवैयर्थ्यपरिहारार्थं प्रयोजनवदर्थज्ञा
नाख्यदृष्टेन स्वाध्यायाध्ययनं विधीयते प्रयोजनवदर्थज्ञानादिसाधनीभूतस्वाध्यायोद्देशेन वाध्यय
नमात्रेलब्धप्रत्ययेन स्वाध्यायस्य कर्मत्वाभिधानात् अतश्चस्वाध्यायार्थस्य प्रयोजनवत्त्वसिद्धौनास
यिग्राहकवशेन लक्षणा अर्थवादेषु लक्षणीयश्चार्थः सन्निहितविधिनिषेधापेक्षितत्वात्स्तुतिनिंदा
रूपः तथाहि लिङाद्यर्थो लोके पुरुषाशयः वेदे तदभावाल्लिङादिनिष्ठ एवकश्चिद्धर्मः वाच्यतावच्छेदकं
चोभयसाधारणं व्यापारत्वं नतु प्रवृत्तिनिवृत्तिप्रयोजकत्वमपि तस्यान्यलभ्यत्वात् तत्र न भोभावेऽ
ख्यातार्थप्रवृत्तिप्रयोजकत्वं नत्स्वेतु तदर्थप्रवृत्त्यभावप्रयोजकत्वं संसर्ग इति विशेषः प्रयोजकत्वं चात्र
प्रवृत्तितदभावकारणीभूतेष्टानिष्टसाधनताज्ञानजनकज्ञानविषयत्वं अभावकारणता च योगक्षेमसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारणी तत्वंच प्रवृत्तिसामग्रीविघटकत्वं सचलिङाद्यर्थो विधिवाक्यप्रवर्त्तनाप्रेरणाविध्यपरपर्यायः निषे
धवाक्येनचनिवर्त्तनानिवारणानिषेधप्रतिषेधापरपर्यायः इयंच द्विविधापिशाब्दीभावना तस्याश्चभाव्यं
यथायोगंप्रवृत्तिनिवृत्ती शाब्दभावनाज्ञानंकरणं करणत्वंचात्रभावनाभाव्यनिष्पादकत्वं इतिकर्त्त
व्यताचयथायोगंस्तुतिनिंदे स्तुतिनिंदाज्ञानस्यहि प्रवृत्तिनिवृत्तिप्रयोजकसहकारित्वंरुच्यरुच्युत्पाद
नद्वारालोकसिद्धं स्तुतिनिंदापदवाच्येप्राशस्त्याप्राशस्त्यापरपर्यायेबलवदनिष्टाननुबंधित्वानुबंधि
त्वयोग्यत्वरूपेतेचयथायोगंविधिनिषेधापेक्षितत्वात्तत्समभिव्याहृतार्थवादैर्लक्षणयाप्रतिपाद्येते त
त्रवायुर्वैक्षेपिष्ठेत्यादौ स्वशब्दक्षेपिष्ठत्वादिगुणेनबललक्षणयायजमानःप्रस्तरइत्यादौतुगौणीगत्यास्व
कार्यकर्तृत्वादिगुणयोगादितिवक्ष्यते अतःसिद्धभावनान्वितस्तुतिनिंदाविषयकप्रमाजनकत्वेनार्थ
वादानांधर्माधर्मयोःप्रामाण्यमितिप्रयोजनंपूर्वपक्षेअर्थवादानुपस्थितप्राशस्त्यज्ञानादपिप्रवृत्तौफ
लसिद्धिः सिद्धांतेतुमंत्रवदर्थवादानामेवप्ररोचकत्वनियमात्तदुपस्थितप्राशस्त्यज्ञानादेवप्रवृत्तौसेति
द्रष्टव्यं॥ विधिर्वा॥ औदुंबरोयूपोभवत्यूर्ग्वाउदुंबरऊर्क्पशवऊर्जैवास्माऊर्जंपशूनाप्नोत्यूर्जोवरुध्यै इ
त्याद्यर्थवादेषुनस्तुतिलक्षणाशक्त्यैववपशुरूपफलसंबंधविधायकत्वेनप्रामाण्योपपत्तेः पशूनितिद्वि
तीययाऊर्जोवरुध्याइतिचतुर्थ्याचापशूनांसाध्यत्वावगतेसाधनापेक्षायांदौदुंबरत्वंसाधनंसन्निधानात्
ऊर्जेतितृतीयाश्रवणाच्चभवतीत्याख्यातेनचलक्षणयेष्टशक्त्यैववाभावनाभिधानाद्धातोश्चयूपोत्पा
दकछेदनाद्यनुवादकत्वादप्राप्तार्थत्वेनचलेरूत्वनिश्चयाद्ऊर्जयविशिष्टभावनाविधायकत्वोपपत्तिरित्या

२

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेपप्राप्तेस्त्रपकर्त्तृकभावनाप्तिसिद्धायां भावनायांस्त्रपस्यैव भाव्यत्वौचित्याच्चैस्सन्निधानाच्चयूपोद्देशेनैवौदुंबरत्वविधिर्न
तु फलोद्देशेन कामशब्दाद्युभावेन फलत्वस्य तथानुपस्थितेः किंच भवन्मते गुणफलसंबंधोयं न चासौ संभवति
आश्रयालाभात् सोमापौष्णं त्रैतमालभेत पशुकाम इति प्रकृतस्य यागस्याश्रयत्वे हि यूपग्रहणानुपपत्तिः यू
पस्य तु अप्रकृतत्वादेवाश्रयत्वानुपपत्तिः अतिदेशेन तस्योपस्थितिस्तु जुह्वादिपात्रांतरसाधारणेति ते
षामप्याश्रयत्वे तथैव यूपग्रहणानर्थक्यं वाक्येनाश्रयदाने च वाक्यभेदः तस्मात् गवौदुंबर इत्यादिर
र्थवाद एवौदुंबरत्वस्येति सिद्धं प्रयोजनं यागफलात्फलांतरकामनायामौदुंबरो यूप इतरथा खादिरः पूर्व
पक्षे सिद्धांते तु औदुंबर एवेति हेतुर्वा ॥ चातुर्मास्येषु शूर्पेण जुहोतीति शूर्पकरणकं होमं विधाय श्रुतेन न
ह्यन्नं क्रियत इत्यर्थवादेन न स्तुतिलक्षणा अपि तु होमसाधनत्वे साध्ये अन्नकरणत्वस्य हेतुत्वं विधी
यते न तत्र पूर्वत्र भाव्यत्ववत् किंचित्कल्पनीयमस्ति हिशब्दश्रुत्यैव हेतुत्वाभिधानात् न हेतुश्च व्याप्ति
मंतरेणानुपपन्नो यद्यदन्नकरणं तेन तेन होतव्यमिति व्याप्तिवचनकल्पापत्तिः ततश्च शूर्पादन्यस्यापि
दर्वीपिठरादेर्होमसाधनत्वप्रतीतेर्विधौ शूर्पपदमुपलक्षणमवश्यं स्यात् अनुवादो वा यद्वा तच्छब्देन शूर्पस्यै
व परामर्शात्तत्कृतमेवान्नकरणत्वं हेतुः तेन च विशिष्यैव व्याप्तिकल्पनादन्नकरणसमर्थशूर्पव्याव
त्तावपि न विधिस्वरूपशूर्पपदमन्यथानेयमिति पूर्वपक्षः सिद्धांतस्तु क्रियत इति लडंतनिर्देशाद्वर्तमानान्नकर
णत्वस्य हेतुत्वं वाच्यं न च होमकाले अन्नकरणत्वं संभवति अतो लटा भूतभविष्यत्कालांतरलक्षणा
विधौ तदाप्यावश्यकी यद्यपि च यं प्राशस्त्यलक्षणोपयोगिगुणघटकतया ममाप्यावश्यकी तथापि अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०दी०
३

वादस्थत्वात्प्राशस्त्यपोषकत्वाच्च समानदोषः वर्त्तमाननिर्देशं विनातदप्रतीतेः। किंचापेक्षितप्राशस्त्यपरत्वे संभवति
नानपेक्षितहेतुपरत्वांगीकारोयुक्तः अतः सिद्धं सर्वेषामर्थवादानां स्तावकत्वेन प्रामाण्यं॥ तदर्थशास्त्रात ॥
मंत्राणां धर्माधर्मयोः प्रामाण्यमस्तिनवेति चिंतायां नतावद्विधित्वेन प्रामाण्यं तस्य द्वितीयं निराकरिष्यमाणत्वा
त् नापिस्तावकत्वेनार्थवादवत् तेषां हि नन्निहितेन विधिना पदैकवाक्यत्वं फत्वं स्वसमर्पितप्राशस्त्यो
न्वितभावनाविषयकशाब्दप्रमाजनकत्वं मंत्राणां तु दूरस्थत्वेन पदैकवाक्यत्वानुपपत्तेर्नतद्विधया प्रामाण्य
संभवः नापि प्राशस्त्यं स्यात्तेत्रैणवाक्यार्थः पदार्थविधयोपस्थितत्वात् नोप्यर्थस्मारकत्वेन प्रामाण्यं अनधि
गतार्थबोधकत्वाभावेन तदसंभवात् सामर्थ्यमंत्राणामर्थाभावेन याथार्थ्यस्याप्यनुपपत्तेश्च नच प्रामाण्याभावे
पि स्मारकत्वादिना प्रयोजनवत्वमात्रांगीकारः ध्यानाद्युपायांतरेणापि स्मृतिसिद्धेर्नियतमंत्राम्नानवैयर्थ्या
त् प्रयोगासमवेतार्थस्मारकेषु स्मृतिवैयर्थ्याच्च अतो अधिकाराख्यप्रकरणादिनाऽवगततत्तत्क्रत्वंगभावा
नां मंत्राणामुच्चारणमात्रमदृष्टार्थं विधीयते स्वाध्यायविधिश्चोच्चारणोपयोगि प्रयोगप्राश्चुभावफलक
तयैवाध्ययनं विधत्त इति नकश्चिद्दोष इति प्राप्ते अभिधीयते दृष्टसंभवत्यदृष्टकल्पनानुपपत्तेः प्रयोगसमवेतार्थस्म
तिरेव संभवतां मंत्राणां प्रयोजनं असंभवतां तु कामं भवत्वदृष्टं प्रयोजनं शक्यते तु तत्रापि मंत्रा अर्थप्रकाशना
र्थाः प्रकाशनं परमदृष्टार्थमिति वक्तुं साम्नां तु अक्षराभिव्यक्तिरेव दृष्टं प्रयोजनमर्थाभावेप्याहते अन्न कु
साम्नां तु अदृष्टार्थत्वमेवेत्यन्यत्र विस्तरः न चैतावता सर्वत्रैवादृष्टार्थत्वं नच मंत्राणां नियमेन पाठवैयर्थ्य
तद्बलेन मंत्रैरेव स्मर्तव्यमिति नियमकल्पनात् नित्यस्य चादृष्टफलकत्वेपि न दोषः नचैवं सामर्थ्यादेव तत्रम ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राणां विनियोगसिद्धौ पुनस्तेषां क्वचिद्धि नियोगकरणं व्यर्थमितिवाच्यं गुणपरिसंख्यार्थत्वेन सार्थक्यात् त
थाहि अर्थप्राप्तेऽभ्यादाने विकल्पेन चतुर्णां मन्त्राणां लिंगेन प्राप्यमाणानां प्रापकप्रमाणात्पूर्वमेव प्रावृत्तेन नताचतु
र्भिरादत्ते इति वचनेन मंत्रसंख्योऽन्यविशिष्टादानभावनायां विहितायां मेतद्वचनाभावेपि मंत्राणामादानस्य च प्रा
प्तिसंभवे एतद्वचनप्रवृत्तिफलजिज्ञासायां समुच्चयफलकचतुःसंख्यारूपगुणप्राप्तिरिति निश्चीयते तथा
लिंगादेवाग्निचयनांगमन्तरशनादाने प्राप्यमाणस्य मंत्रस्य ततः पूर्वप्रवृत्तेन इमामगृभ्णन्नरशना
नामृतस्येत्यश्वाभिधानीमादत्ते इत्यनेन मंत्रविशिष्टादानेऽश्वरशनांगत्वेन विहिते पूर्ववत्फल
जिज्ञासायां गर्दभरशनानिवृत्तिरूपशेषिपरिसंख्याफलं न च फलतः परिसंख्यायां स्वार्थहानिः
परार्थकल्पना प्राप्तबाध इति त्रैदोष्यं अश्वाभिधानीसंबंधरूपस्वार्थस्यैव विधेयत्वात् अन्यनि
वृत्तिरूपपरार्थस्यार्थसिद्धत्वेनाकल्पनीयत्वात् प्रापकप्रमाणस्याप्रवृत्ततया प्राप्तबाधाभावा
अतएव च्चैयत्र प्रापकप्रमाणप्रवृत्तस्ततस्मैव परिसंख्याशास्त्रस्य प्रवृत्तिर्यथा पंच पञ्चनखा भक्ष्या इत्यादौ रा
गप्राप्तपञ्चनखभक्षणे पंचातिरिक्तपरिसंख्याकरणे तस्मैव तत यत्रापि च श्रौती परिसंख्या यथा ना
नृतं वदेदित्यादौ तत्रापि न तत् अतएव शाब्दतः फलतो वा यस्य शास्त्रस्यान्यनिवृत्तिर्विषयः सप
रिसंख्याविधिः अत्र चैतद्धिध्यनावश्राय शाओत्सर्गिकी तत्र चान्यत्र च प्राप्तिर्न तु सापि लक्षण
घटिकेति ध्येयं अतएवैकस्मिन्कार्ये नतस्य सत्वेन सह पाक्षिकप्राप्तावपि नानृतं वदेदिति परिसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰दी॰
७॥

स्येवेयं नतु नियमविधिः अतएव यस्य शाद्धतः फलतो वा प्राप्तियोगव्यावृत्तिनूपो नियमः शास्त्रार्थस्य विषयः स नियमविधिः यथा सस्यमेव वदेत् व्रीहिन् अवहंतीत्यादौ अत्र नियमस्यैवायोगव्यावृत्त्यर्थकेन एवकारेण विधेयत्वात् आक्षेपतः पूर्वप्रवृत्तस्यावघातविधेर्नियमफलकत्वाच्च नियमे प्राप्तियोगः स्वतन्मात्रविध्यप्रवृत्तिनिमित्तको विध्यंतराप्रवृत्तिसहितत्वाद्विध्यप्रवृत्तिनिमित्तकस्यैत्यादिप्रकारेण बोध्यः व्रीहिन् अवहंतीत्युत्तरेहनूहित्रात्रस्याग्रस्तल्युत्याद्यबाधः एतद्विध्यभावे आक्षेपणनिर्देशेन चावघातेन तस्य बोधो बिना हननस्य पक्षप्राप्तत्वात् व्रीहिभिर्यजेतेत्यादौ द्वितीयः पंचविध्यभावसहितत्वाद्विध्यभावे व्रीहिणामाक्षेपेण पक्षप्राप्तत्वात् ॥ एवं विधभेदसत्त्वेपि च अयोगव्यावृत्तिमात्रस्यैव लक्षणे प्रवेशात् कोपि दोषः यत्तु दृष्टार्थत्वे नियमविधिलक्षणं केचिदुक्तं तदुत्तरेहनहित्रात्रस्याग्रस्तल्युत्यादावव्याप्तत्वादुपेक्षितं तत्रादृष्टप्रह्याणाभ्यासस्यादृष्टार्थत्वात् अतएव नियमपरिसंख्यातिरिक्तफलकविधित्वमपूर्वविधित्वमितितल्लक्षणं सूक्तं खंडितं सांख्योपाधीनां क्वचिदुदाहरणे सांकर्येपि न दोष इति न विधिरसायनोक्तलक्षणं दूषणं वक्तारः विस्तरेणचैतदस्मत्कृतमीमांसाकौस्तुभे द्रष्टव्यं ॥ तदेवं मंत्राणामर्थस्मारकत्वेपि न विनियोगवैयर्थ्यं ॥ न चैवमपि प्रामाण्यप्रयोगः ॥ यायाप्यर्थलक्षणस्य तु स्याविद्यातात् ॥ सामान्यादि सर्वमंत्रसाधारण्येन तु पदार्थविधर्ययथाहिताहवो धर्मातिकार्यभूतज्ञानविषयत्वादृढः प्रमाणमितिसर्वेरदृढमनं तं तथा पदार्थज्ञानस्यापि कारणत्वात् तदार्थोपि तत्प्रत्येति राख्यतेय तुं ॥ अतश्च मंत्राणि विनियोग विधौ मंत्राणामविपदार्थत्वाद्युक्तेः प्रामाण्यमितिं अरुक्त्वा प्रामाण्याभावेपि प्रयोजनजननत्वमात्रं तावतैवाप्यनविधेरुपपत्तेः प्रयोजनमर्थवादवदेवस्येष्टं ॥
॥ ॥ इति भाट्टदीपिकायां खंडदेवकृतौ प्रथमाध्यायस्य द्वितीयः पादः ॥ ॥ धर्मस्य शिष्टत्रैवर्णिकपरिगृहीतानां मन्वादिप्र

॥७॥

7

णीतस्मृतीनां धर्माधर्मयोः प्रामाण्यं न वेति संदेहे सन्मूलकत्वनिश्चायकाभावादप्रामाण्यं ॥ न ह्यत्र प्रत्यक्षादिमूलं तेषां धर्माधर्मयो
रम्यते ॥ वेदस्य च प्रत्यक्षपठितस्यानुपलंभात् । उपलंभे वा स्मृतिप्रणयनवैयर्थ्यात् । प्रत्यक्षपठितस्य इदानीमुच्छेदस्य च वैदिकै
र्यथापरिगणनं शाखानां मा प्रामाण्यापरित्यागेन पाल्यमानतया कल्पयितुमशक्तेः न च नित्यानुमेयो वेदो मूलं स्मृतेर्मूलस्यामान्यव
त्त्वे पि वेदव्याप्तत्वाभावेनानुमानानुपपत्तेः । मनोरप्यनुमेयत्वकल्पने ग्रंथपरंपरानुपलंभाच्च । अतश्च सन्मूलत्वासंभवात् भ्रांत्यादिमू
लत्वेनाप्रामाण्यमिति प्राप्ते शिष्टानामघया वेदवगीतपरंपरया ज्योतिष्टोमादिविधिवाष्टकाकलिंजभक्षणादिप्रतिषेधयोर्धर्मत्वेनाध
र्मत्वेन च परिग्रहान्मन्वादीनां त्रैवर्णिकत्वेन वेददर्शनसंभवाच्च तन्मूलत्वमेव युक्तं न तु भ्रांत्यादिमूलत्वं तत्कारणस्याद्याप्यावत्तदज्ञान
स्य च कल्पने गौरवाच्च । श्रुतिश्च प्रत्यक्षपठितैव तन्मूलं न तु स्मृतिप्रणयनवैयर्थ्यं । शाखांतरीयोपसंहारेणार्थवादोद्धारेणान्य
यसिद्धार्थकथनेन च स्मृतिप्रणयनसार्थक्यात् । अतो मूलश्रुत्युपस्थापकतयैव धर्माधर्मप्रमाप्रयोजकत्वं स्मृतीनामिति सिद्धं ॥
विरोधश्रुतिविरुद्धानामपि औदुंबरीसर्ववेष्टनत्वेत्यादिस्मृतीनां श्रुतिमूलकत्वाविरोधात्प्रामाण्यं । न चौदुंबरीस्पृश्योद्गायेदिति प्रत्यक्ष
श्रुतिविरोधात्तदनुपपत्तिः । परस्परविरुद्धार्थकानामपि ग्रहणादिश्रुतीनां बहुशो दर्शनेन विरोधे सत्यपि तत्कल्पने बाधकाभावात् ।
तद्वदेव विकल्पेन विरोधस्य परिहर्तुं शक्यत्वाच्च । न ह्यत्र प्रत्यक्षश्रुत्या स्मृतेर्मूलाकांक्षा निवर्तते । येन कल्पनामूलोच्छेदाद्विरुद्धप्र
त्यक्षश्रुत्या लिंगस्येव स्मृतेर्बाधः स्यात् । न चार्थवैरूप्योपक्रमयोरिवात्र विषययोरस्ति विरोधः येनोपक्रमप्रत्यक्षेणोपवृत्त्यानुमानेन स्य
मृतेः प्रमेयापहारलक्षणो बाधः स्यात् । न चैतद्वैकल्पिकत्वेन द्वयोः संभवादिति प्राप्ते भाष्यकारेणैवं सिद्धांतितं सर्वत्रानुमाने
नुमेयजिज्ञासायाः कारणत्वात्प्रत्यक्षश्रुत्या च स्पर्शविधानेनावेष्टितत्वरूपेणौदुंबर्याः परिच्छिन्नत्वात् जिज्ञासाभावेनानौदुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शवेष्टनविषयकश्रुत्यनुमानसंभव ॥ तथा प्रत्यक्षश्रुतिविरोधाभावेऽपि यत्र लोभादिदर्शनं यथा वैसर्ज्जनहोमीयं वासोऽध्वर्युः प्रतिगृह्णा
तीत्यादौ तत्रापि न श्रुतिकल्पनं दृष्टहेतोरेव मूलत्वोपपत्तिरिति ॥ वार्त्तिककारस्तु ॥ जिज्ञासाया अनुमितत्वं गतत्वं । अग्न्याधेजिज्ञासायामपि न दुर्ब
यात्रा सत्यपि वा तस्याः कारणत्वे अनुमितिविषयश्रुतेर्जिज्ञासितत्वाच्च प्रत्यक्षश्रुतिविरोधाभावे वा लोभादिमूलत्वाङ्गीकारे चाष्टकास्मृतेर
पि तद्वापत्तेः ॥ अतश्च प्रत्यक्षश्रुतिविरोधे विस्मृतिशिष्टत्रैवर्णिकपरिग्रहाविशेषेणाश्रुतिमूलकल्पनोपपत्तेर्युक्तमेव प्रामाण्यं परं तु प्रा
बल्यश्रुतिनिश्चयं वेष्टनं नानुष्ठेयं अर्थवादाद्युन्नीतविधिमूलकत्वस्यापि स्मृतिषु दर्शनेन प्रकृतेऽपि तन्मूलकत्वस्य संभावितत्वात्तस्य चो
पयनस्य प्रत्यक्षश्रुतिविरोधे आभासत्वसंभावनात् अतश्च यावच्छ्रुतिनिश्चयं अननुष्ठानलक्षणप्रामाण्यमित्यभिप्रायः सूत्रमिति
प्राहुः यद्वा शाक्यादीनामपि स्वत्रैयत्वप्रसिद्धेर्वेददर्शनसंभवेन तत्प्रणीतस्मृतीनामपि वेदमूलत्वं तन्मूलो वेदश्चेदानीं प्रलीन इति प्राप्ते शि
ष्टत्रैवर्णिकानां धर्मत्वेन परिग्रहस्य पूर्वाधिकरणानुरुद्धहेतोरभावान्न श्रुतप्रामाण्यत्वेनैव तेषां स्मरणाद्वा प्रामाण्यवादिभिरेव च
तत्प्रामाण्यस्वीकाराद्वेदमूलकत्वकल्पनानुपपत्तेरप्रामाण्यमिति सूत्रार्थः ॥ शिष्टाकोपे स्मार्त्तनामाचमनादीनां श्रौतैः क्रमकालपरि
माणादिभिर्विरोधे श्रौतत्वात् क्रमादीनामेव प्राबल्यात्तद्विषयस्मृतीनामप्रामाण्यं न हि श्रुतेराचामेदिति विहितस्य स्मार्त्तस्याचमनस्य वे
दवेदिकरणमध्येऽनुष्ठाने वेदं कृत्वा वेदिं करोतीति श्रुतिबोधितः क्रमोऽनुष्ठातुं शक्यते स्मार्त्तपदार्थानां च बहुत्वात् पूर्वाह्णादिः कालः प्रयो
गविध्यवगतं च परिमाणं न शक्यते नु ग्रहीतुं न च श्रौतत्वेऽपि क्रमादेः पदार्थधर्मत्वात् सदार्थभूतेभ्य आचमनादिभ्यो दौर्बल्यात् प्रमाणद्
र्वैकल्यात् मेयानुगमस्य प्रथमावगतप्रमाणेन गतप्रमातागन्तावबलापेक्षयाप्रमेयबलाबलस्य दौर्बल्यादिति प्राप्ते पदार्थप्राप्य
पेक्षत्वात् क्रमादेरौत्तरकालिकत्वा व[illegible]त्प्रमाणगम्यपदार्थाविरोधेनैव कल्पनीयत्वान्नतावत् पदार्थविरोधित्वं । परिमाणं तु नक्रस्य

॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्चिद्यास्वस्यार्थइति न नस्यु श्रोतस्य विरोधे पिस्यावमानादीनां पदार्थत्वात्प्राबल्यमेव प्रमाणमार्गानां हि न स्वरूपतो विरोधोपि प्रमेयाविरोधनिबंध
नः। तथदैव प्रमेयविरोधआलोच्यते तर्हि बहुतेन बलाबलेन निलीतिशास्त्रार्थेन प्रमाणबलाबलस्य नियामकत्वमिति प्र
माणमेवेस्मृतिः॥ यद्वा॥ यच्छावस्यादिग्रंथेषु वेदाविरुद्धपदानादिवचनं तस्य भवेतु-श्चा प्रमाणते स्याशाक्यस्वाध्यायोध्ये
तव्यः। वेदोखिलो धर्ममूलं तद्विदां च स्मृतिशीले पुराणन्यायमीमांसाधर्मशास्त्राणि मिश्रिताः वेदाः स्थानानि विद्यानां
धर्मस्य च चतुर्दशेत्यादिवचनैः नियत प्रमाण प्रतिपाद्यानामेव धर्मत्वप्रमितेरन्यतः प्रमितेस्तस्य फलसाधनता
भावात्तेषाम प्रामाण्यमिति। अपि वा कारणाग्रहणे अनिबद्धानां वसंतोत्सवाद्याचाराणां प्रामाण्यं न वेति संदेहे एतेषां
वेदमूलत्वे अष्टकादिवन्मन्वादिभिर्निबंधनापत्तेः। सामान्यतस्तद्विदां च स्मृतिशील इत्यादिना निबंधनेपि विशेषतो
निबंधनेन तेषां श्रुतिदर्शनाभावनिश्चयात्त्वयाद प्रामाण्यमिति प्राप्ते धर्मबुध्या वैदिकैरनुष्ठीयमानत्वात्स्मृतिवद्वे
दवैदिकत्वं विशेषतोनिबंधनं तु गौरवभियान दोषः। व्यतिक्रमसाहसदर्शनं तु तु धर्मबुध्यानुष्ठीयमाने चान्त्यवैदिक
। नचैतावता सर्वस्याधवैदिकत्वं। अत आचाराणामपि धर्माधर्मयोः प्रामाण्यं। तेषु दर्शनात्॥ अथेराकप्रयोगरूपस्या
चारस्य यत्र आर्यम्लेच्छयोः परस्परमर्थविप्रतिपत्तिर्यथा पीलुशब्दस्य वस्त्रविशेष आर्याणां हस्तिन्यन्येषां तत्र
तुल्यबलत्वं। व्यवहारे आर्याणामि वम्लेच्छानामप्यभियुक्तत्वाविशेषात्॥ अथवाप्रस्मरणस्याभ्यत्रापि समानत्वाद्वेतिप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेशावश्यताव छेदकभेदेनानेन शाखिकत्वनप्रसंगादेकत्रैव शाखिनोभयत्र। नचविनिगमनाविरहः आर्यप्रसिद्धेरेवनियाम
कत्वात्। आर्याहि शास्त्रैकसमधिगम्यधर्माधर्मयोरविप्लुतिलिप्सया शास्त्रार्थतत्त्वं परिपालयंति न स्वेच्छया दृष्टार्थव्यवहारस्यच
थाकेषांचिदपिसिद्धेः। अतस्तत्प्रसिध्या दृष्टविशेषएव शाखिनः येन प्रतीतिस्तत्र लक्षणया शाखिसमाहुः यत्र तु नियामका
भावस्तत्रागत्याऽक्षादिशब्देषु अयत्राऽपि शाखिनः आर्याणामेवोभयत्रप्रयोगात् तत्रापि क्वचिद्बहुवचनविशेषस्य नियाम
कतायथा मन्त्रान्याओषधयो म्लायंते अथैते मोदमाना एवोत्तिष्ठंतीत्यनेन यवशब्दस्य दीर्घशूकएव शाखिनः प्रियंगुषु कुल
क्षणादिनेति एवंवा यत्र मातुलकन्यापरिणयादौ स्वाचारयोर्विरोधस्तत्रोभयोरपि स्मृतिकल्पकत्वात्तुल्यबलत्वमिति
प्राप्ते स्मृतीनां सप्रत्यक्षप्रतीतत्वात् स्मृतिषु कर्तव्यतावाचिविधिप्रत्ययश्रवणाच्च बलीयस्त्वं। आचारेषु तु आचरितृणां जेनाना
मचाद्यपेक्षया तथाप्रत्ययितेतरत्वाभावाद्विप्रकीर्णपरप्रकरणादिगतस्य वगमस्याशक्यत्वात्परकीयाचारमा
त्रदर्शनेन कर्तव्यतावाचिविधिप्रत्ययस्यापि रूपकल्पनीयत्वाच्च दौर्बल्यं अत एवेदानींतनैरनाचारदर्शनेन स्मृतिर्द्रष्टुं स्मृ
तिकारस्य स्मृतिः तदुपदेशं वा कल्पयितुं चाशक्तिः तुल्यन स्मृतीनां तुल्यत्वाद्वेति विशेषः अतः स्मृतिविरोधे आचारस्यांस्यया
वश्रुतिदर्शनं स्मृतिदर्शनं वा अनुष्ठानं। एवंवा त्रिवर्षपूर्वस्वलादिशब्देषु यत्र लोकवाक्यशेषयोर्विप्रतिपत्तिस्तत्र पदपू
दार्थसंबंधे लोकवेदस्याविशेषप्रमाणाभावात्तेषु तुल्यत्वमिति प्राप्ते विषयैक्याभावे विधिस्ततोऽरिक्तवाक्यतानुपपत्ते
र्विधिवाक्यशेषस्यैव शाखिन्ग्राहकत्वमनुमन्यते। अतस्तल्लोकप्रसिद्धस्य माणवगतेर्यैशाखिकत्वनाभिधानशक्तिरपि तु लक्ष

KKSU LIBRARY RAMTEK 441 106 M-1577 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणादिनाबोधः। अत एव यत्र यास्यपत्रो षोनाश्रित त्रापि त्रिवृदादि पदार्थो वैदिक एव गृहीतव्य इति वक्ष्यते अतश्च
त्रिवृद्घृद्वस्य लोत्र गत ऋग्न वकंत्रास्य न तु त्रैगुण्यं च रज्ज्वादेः स्योदन स्थाली अश्ववाल चरादेस्य कारणः तान्श्चवेदेशः
वास्य प्रत्रो षाश्च कौस्तुभेद्र ष्टव्याः चोदितं तु। यत्रापि कनेम सततामरसादिशब्दानां नार्याणामर्थविशेषप्रसि
द्धिः म्लेच्छेतु पिकः कोकिलः नेमऽर्धे सतं बृहत्सात्रेदारुमयं त्रातछिद्रं परिमंडलं तामरसं कमलमित्येवं प्रसि
द्धिः तत्र तत्प्रसिद्धार्थस्यैव ग्रहणं न तु निगमनिरुक्तादिना तत्कल्पनं। न च म्लेच्छेषु शब्दार्थयोर्व्युत्पत्तिदर्शनेन तत
त्प्रसिद्धेरविश्वसनीयता। पिकादिशब्दानां वेद एव दृश्यमानत्वेनाविप्लुतत्वात् अतश्च तेषां वाक्याकांक्षायां
तत्प्रसिद्धेरपेक्षमतया ग्राह्यकत्वं च अतएव निगमादिप्रसिद्धेरपि प्रसिद्धत्वेन प्राबल्ये पिकशब्दस्य तत्वेन दौर्बल्यं।
म्लेच्छप्रसिद्धेम्लेच्छप्रसिद्धित्वेन दौर्बल्ये पिकत्वेन प्राबल्यं। प्रमाणबलाबलस्य बलापेक्षया प्रमेयबलाबल
बलीयस्त्वस्यास्थापितत्वात् अतएवेनात्र विशेषतः पूर्वपक्षः कथितः॥ प्रयोगशास्त्र॥ सर्वस्मृतीनां कल्पसूत्राणां
वा ब्राह्मणानामेव वाराणस्यादि ग्रंथानां वा वेदत्वं वेदतुल्यत्वं वा भवतु श्रुत्यादिमूलकत्वे गौरवानुनिस्यबन्नेय
त्रविधिविषयत्वानुपपत्तेश्च अंगानां तु षडंगमेक इति स्मृतेरपि वेदत्वं बुद्ध बौधायन मशकादिभिः स्मृतिसमा
ख्याकृतादिभिः स्मृतत्वात् प्रवचनं तिमितत्वेनाप्युपपन्नेति प्रासेदृढ कर्तृस्मरणात्कठादिवत् प्रवचनिमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰टी॰
॥७॥

तत्वानुपपत्तेर्नैषां वेदत्वं वेदतुल्यत्वं वा प्रतिमन्वंतरं चैवं विधानां मंत्राणां ग्रंथानां सत्वान्नित्यस्य ब्रह्मयज्ञविधिवि
षयत्वोपपत्तिः षडंगमेकं इति तु नैवस्कृतोपन्यासः एकपदस्यैव णत्वतस्मादेषां स्मृत्यधिकरणन्यायेन वेदमू
लकत्वमेव शाक्यादिग्रंथानां तु तदसंभवादाभासत्वमेव प्रयोजनं कल्पादीनां वेदत्वे तत्तुल्यत्वे वा यत्र प्रत्यक्ष
श्रुतिविरोधस्तत्र विकल्पः ८ अपुत्रे वा प्रत्यक्षश्रुतिविरोधाभावेपि न्यायाभासोपन्यासपूर्वकं कल्पसूत्रवचनं त
त्रापि वचनादेव तदनुष्ठानं न्यायोपन्यासस्तु हेत्वधिकरणन्यायेनार्थवादः सिद्धांते तु प्रत्यक्षश्रुतिविरोधेन्यथा
वन्मूलश्रुतिदर्शनमप्रामाण्यं श्रुतिदर्शने तु विकल्पः यत्र तु न्यायोपन्यासरहितं मीमांसान्यायवि
रुद्धं स्मृतिवचनं तत्र श्रुतिमूलत्वसंभवेन वचनं विरोधे न्यायस्यैवाभासत्वात्तदर्थ एवानुष्ठेय इति अत्र सर्व
त्रोदाहरणानि मूलोक्तोदाहरणे द्रष्टव्यानि चास्मत्कृते कौस्तुभे द्रष्टव्यानि ॥ अनुमानं ॥ अथ यत्र स्मृतिषूपा
त्तव्यवस्था यथा गोतमीया छंदोगैरेव तथाचारेषु कर्तव्यव्यवस्था यथा होलाकादि प्राच्यादिभिरेव तत
त्र तदनुमेयश्रुतिरपि अनुमापकस्य नियतविषयान्नियताधिकारिकैवेति नान्ये तस्तदनुमेयमिति प्रा
मेपि अनुमापकं तदनुमेयश्रुताविशेषणं प्राच्यत्वादि दातुं शक्यं न हि प्राच्यत्वं शक्यं वक्तुं नाम सर्वोच्च
रित्रनुगतजातिव्यक्तिषु एवं संस्थानादिभिर्निर्वक्तुं शक्यं तत्तद्देशागतानाप्यनाचरणात्कचिरवि

॥७॥

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्गतिपुत्रपौत्राणामप्यानुरणाच्च। अतो विशेषणाभावात्सर्वविषयत्वं गौतमीयादिस्मृतिषु नतु छंदोगाधिका
रकत्वसामर्थ्येन कृतावपि तत्संभाव्येत। पाठमात्रं तु तेषां स्मृतिकर्तुस्तच्छाखीयत्वादुपपन्नः कर्त्ता हि छंदोगः स्वशि
ष्यान् छंदोगान्स्वग्रंथमध्यापयामास ते च पन्याइत्येवं पाठतमात्रव्यवस्थितनामिति तत्रापि सर्वविषयत्वमेव
प्रयोगः स्मृत्यधिकरणन्यायेन सिद्धमपि व्याकरणप्रामाण्यमाक्षिप्यते नियमद्वयार्थं हि तत्साधुनैव प्र
युंजीत नासाधुना इत्येको गवादय एव साधवो न गाव्यादय इत्यपरः न चानियमद्वयस्य मूलं संभवति
प्रतिगव्यादिशब्दमनेकस्मृतिवाक्यपाठासंभवात्तु साधुत्वस्य पूर्ववत्त्रिवचनासंभवेनानुगतैकस्मृ
तिकल्पनानुपपत्तेश्च न हि साधुत्वं नामार्थप्रत्यायकत्वं अनादित्वं वाचकत्वं वा गाव्यादिष्वपश
ब्देष्वपि सत्त्वात् अपशब्दानां केचिद्वाचकत्वाभावे गवादिषु गौणत्वस्याप्यसंभवाच्च अतो
वाचकत्वाविशेषान्न व्याकरणेन नियमः संभवतीति प्राप्ते योगप्रत्यययोः साधुशब्दापभ्रंशानां भ्रं
गाव्यादिशब्दानां नष्टशब्दोपस्थानद्वारोपपत्तेर्न वाचकत्वकल्पना अनेकशक्तिकल्पनापत्तेः
इदानींतनानां च शक्तिभ्रमात्तो न च घटकलशादिवदपि निगमनाविरहः पाणिन्यादिप्रणी
तव्याकरणस्यैव नियामकत्वात् न च निर्मूलत्वं प्रयोगनियमे साधुनैव प्रयुंजीतेत्येवंविधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याएतस्याएवश्रुतेर्निष्फलत्वात् साधुत्वं चानादिवाचकत्वमनुपपन्नत्वं वा व्याकरणाभ्यासजनितसं
स्कारव्यंग्याजातिर्वा प्रमितवस्त्वार्थप्रतिपादकत्वं वेति कोस्तु न एव वक्ष्यते तदभावश्चासाधुत्वं प्रत्य
क्षेवच श्रुतिः नाम्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति अयं च निषेधः प्रकरणाज्ज्योतिष्टोमांग
यज्ञमात्रेपि च निषेधो याज्ञे कर्मणि नियमो न्यत्रानियम इति महाभाष्यानुसारात् अत्र हि प्रयोगा
श्रितः साधुनियमः फलोद्देशेन विधीयते रागप्राप्तस्यापि च साधुप्रयोगस्य तस्मादेषा व्याकृता वा
गुद्यतेति वचनादाश्रयत्वसिद्धिरिति स्पष्टं कोस्तु ते गवादय एव साधव इति साधुस्वरूपनियम
स्य तु अनादिप्रयोगपरंपरैव मूलमतः प्रमाणं व्याकरणं यत्तु न्यायमूलकस्फोटादि तत्रोच्यते
श्रुतिविरुद्धं न्यायविरोधे कामं न त्वत्र प्रमाणं प्रयोगस्य चोदना वाचकशब्दप्रसंगाद् दूष्यं किंच
रिति त्वादिजातिस्तद्व्यक्तिर्वा चिंता तदर्थं च लोकवेदयोः शब्दानामन्यत्वमुत नेति चिंतनीयं अन्यत्वे हि उपा
यान्तरेण वैदिकशब्दशक्तिग्रहस्यासंभवान्नाप्याचिंता आरंभणीया एकत्वे तु लोकवृद्धव्यवहारानु
सारेण गृहीता शक्तिर्वेदे प्रकल्पिष्यतीति फलवती चिंता तत्र वर्णभेदेपि स्वरभेदादेस्तु वर्णागमलोपविका
रानुव्यायादिधर्मभेदात्स्वरोस इति क्रमात् ब्राह्मणब्राह्मणेति न्यूनातिरिक्तत्वात् स्थूलपृषतीमत्र
कर्मधारयबहुव्रीह्योः स्वरादंतोदात्तसाधुदात्तत्वादिरूपात् पचेत दक्षिणादे हि भोजनार्थं पचतेत्यत्र
स्थूलपृषतीमनड्वाहीमालभेतेत्यत्र कर्मधारये फिषोन्त उदात्त इति सूत्रेणान्तोदात्तत्वं बहुव्रीहौ बहुव्रीहौ प्रकृत्या पूर्व ८
पदमिति सूत्रेणाद्युदात्तत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र्व्यधिकरणपदसन्निधिरूपाद्वाक्यात् यातः पुनरायातियातोद्वन्द्वस्त्वयज्ञद्वतौ इत्यत्र समानाधिकरणपद
संनिधिरूपश्रुत्या अभ्यद्रुतिअगमदित्यर्थे व्याकरणस्मृत्यातदभिज्ञस्य पदभेदानुभवात् यत्र तु नार्थप्रती
तिस्तत्र सत्यपि धर्मिभेदे दृढतरप्रत्यभिज्ञाबलेनैकत्वावधारणान्नपदान्यत्वं लोकवेदयोरिति यत्तु काश्चिं
तान्तत्रावधानादिक्रियाणां लिंगकारकसंख्यादीनां च जातावयोग्यत्वाद्गोः शुक्ल इत्यादि सामानाधि
करण्यनिर्देशाच्च व्यक्तिवाचित्वमेव। न चैवं जातिबोधानापत्तिः लक्षणया तद्बोधोपपत्तेः। व्यक्तिशक्तिरु
हस्यैव वा कार्यतावच्छेदकं जातिविशिष्टशाब्दबोधत्वं अतो न दोषः न च विनिगमनाविरहः लाघवस्यै
व नियामकत्वात् तथाहि न शक्तिग्रहस्य स्वातन्त्र्येण कारणत्वं अपि तु लाघवात् शाक्यत्वसंबंधेन पि
घटपदवत्ताज्ञानस्यैवान तस्मास्मन्मते घटत्वं धर्मितावच्छेदकीकृत्य शाक्यत्वसंबंधेन घटपदवत्ताज्ञा
नस्य घटो घटपदवानित्याकारकस्य विशेष्यतासंबंधेन विशिष्टशाब्दबोधत्वावच्छिन्नप्रतिकारणत्वं अस्म
न्मते तु घटत्वत्वं धर्मितावच्छेदकीकृत्य तद्वाच्यं अतश्च घटत्वत्वस्य घटेतरावृत्तित्वादिरूपस्यानेक
पदार्थघटितस्य प्रवेशात्तव कार्यकारणभावे गौरवं न मम न च शक्त्यानन्त्यादिदोषस्तस्य फलमुखत्वात्
अतश्च लाघवाद्ब्रह्मकावेव शक्तिर्जातिविशिष्टव्यक्तौ वा। न तु जातावेवेति प्राप्ते घटत्वं धर्मितावच्छेदकी
कृत्य शाक्यत्वसंबंधेन घटपदवत्तानिश्चयस्य कारणत्वं पदत्वं धर्मितावच्छेदकीकृत्य शक्तत्वसंबंधे
न घटवत्तानिश्चयस्य वा घटपदं घटवदित्याकारकस्य कारणत्वमित्यत्र विनिगमनाविरहेणानंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०टी
१

कार्यकारणभावप्रसंगात् अस्मन्मतेतु घटपदसंघर्मितावच्छेदकीभूयशक्यत्वसंबंधेन घटत्ववत्त्वानि०
श्चयस्यैव घटपदं घटत्ववदित्याकारकस्य कारणत्वकल्पनाल्लाघवं। नचममापिविपरीतमापादयितुंश
क्यं। तथासति घटत्वस्य धर्मित्वेन स्वरूपेणतस्य धर्मित्वायोगाद्धर्मितावच्छेदकत्वेन घटत्वत्वस्य प्रवेशे
गौरवस्य तुल्यत्वात् अतोन घटत्वत्वावच्छिन्नं घटत्वे शक्यत्वसंबंधेन घटपदवदित्याकारकज्ञानंका
रणं अपितु घटपदं शक्यत्वसंबंधेन घटत्ववदित्याकारकमेव जातेः स्वरूपेणैवप्रकारत्वोपपत्तौ घटत्वत्व
स्याप्रवेशात् नचसमवायेनान्यप्रकारएवजातेः स्वरूपेण प्रकारतानसंबंधांतरेणे त्यत्रप्रमाणमस्तिप
रैरपितथानभ्युपगमाच्च। अतएवकार्यकारणभावेपि घटत्वं घटत्वएवशक्तिः शक्यतावच्छेदकत्वादि चना
स्मन्मते। अतः प्रथमोपस्थितत्वाज्जातावेवशक्तिः एवमरुणादिशब्देष्वपि गुणएवगुणत्वेवा। ननुतद्वि
शिष्टद्रव्ये कथंतर्हि व्यक्तिबोधः अभेदात् उक्तविधकारणस्य जातिगुणविशिष्टव्यक्तिशाब्दत्वएवका
र्यतावच्छेदकत्वस्वीकाराद्वोपपत्तिः वस्तुतस्तु जातिगुणशाब्दत्वमेवलाघवेन कार्यतावच्छेदकं व्यक्ति
स्तु तृतीयांतस्थलेपशुनायजेत अरुणयाक्रीणातीत्यादौनपदार्थासते जातिगुणयोरेवद्रव्यपरि
च्छेदद्वाराकरणत्वोपपत्तेः लिंगसंख्ययोरपिपाशाधिकरणन्यायेन सामानाधिकरण्येन पार्ष्टिको
जातिगुणसंबंधः। अतःसंबंधविधयैवतत्रद्रव्यबोधः। द्वितीयांतादिस्थलेतु जातिगुणयोः कर्मत्वा
द्यन्वयासंभवाद्व्यक्तेर्लक्षणयाबोधः तस्याएवचकर्मत्वाद्यन्वयः लिंगसंख्याद्यन्वयश्चसाक्षात्संबं

१

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनैव। सामानाधिकरण्यं चव्यक्तिद्वारकमिति सर्वं सुस्थं। प्रयोजनं पूर्वपक्षे रथंतरादिशब्दानां ऋग्वाचित्वाद्र
थंतर[illegible]मुत्तरयोगीयते। स्यादेतदुत्तरापदलक्षितोत्तराकार्ययोनिविधानं। सिद्धांते तु गीत्यतिदेश उत्तरास्वि
ति वक्ष्यते॥ ॥इति श्रीखंडदेवविरचितायां भाट्टदीपिकायां प्रथमस्य तृतीयः पादः॥ ॥उक्तं इह गुण
विधित्वेन नामधेयत्वेन वा संमतानां सर्वेषामेव फलपदातिरिक्तसुबंतानां उद्भित्सोमादिपदानां प्रामाण्यम
प्रामाण्यं वेति संशये प्रकारासंभवादप्रामाण्यं तथाहि उद्भिदा यजेत पशुकामः सोमेन यजेतेत्यादावुद्भि
दादिपदेभ्यः स्फुटतिबुद्धेरनुत्पत्तेर्न तावदर्थवादत्वं। मंत्रत्वप्रसिद्ध्यभावाच्च न तत्। एतेषां प्रयोगकालेऽनुच्चा
रणाच्चैतत्प्रतिपाद्यार्थस्य यागांगताबोधकप्रमाणाभावेनैतेषां प्रयोगसमवेतार्थस्मारकत्वानुपपत्तेश्च
नच विधेयत्वं तद्भावः कामशब्दाद्यभावेन साध्यानभिधायकत्वात् एकपदगतयजिनैव करणप्रतिपादनेन
तेषां तत्प्रतिपादकत्वायोगात्। सिद्धरूपाणां सोमादीनां व्यापारांतरमंतरेण भावनेतिकर्तव्यतात्वानु
पपत्तेश्च नामधेयत्वे तु अभिन्नत्वादेव करणानुग्राहकत्वादिरूपेतिकर्तव्यतात्वानुपपत्तिः। नच कथ
मपि भावनान्वयासंभवेपि यागेनैव करणत्वेनान्वयो भवत्विति वाच्यं। कारकाणां परस्परान्वयासंभवा
त्। अतः कथमपि क्रियान्वयासिद्धेभवादनोख्यातत्वेन च विधिभावनयोरनभिधानादन्यस्य च प्रकार
स्यानिर्वक्तुमशक्यत्वादप्रामाण्यमिति प्राप्ते। अध्ययनविध्यध्यापितस्याप्रामाण्यासंभवात्प्रकारांत
रासंभवेपि विधेयत्वं तदसंभवेपि समस्तपदस्पष्टत्वेन तत्रैव गुणविधित्वेन नामधेयत्वेन वा वक्ष्यमाणरीत्या स
र्वानुपपत्तिपरिहारेण प्रामाण्यमिति सिद्धं॥ अपि वा नामधेयं ॥अतः परं क्व गुणविधित्वं क्व वा नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०दी०
१०

धेयत्वमितिकोदृशो धनिकार्थमारंभः तदिह गुणोकर्मणि चतुल्यवद्वृत्तिकानामुद्दिशादिपदानां विधेयगु
णसमर्पकत्वं नामधेयत्वं वेति चिंतायां भिदविदारणाइति सदृत्या विदारणसमर्थखनित्रादि वचनत्वप्रसि

K K S U LIBRARY
RAMTEK
441 106
M. 1577
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.10.20 10:04
,TRANSFERRED=2020/10/06 at 10:07:56
,PAGES=19
,TYPE=STD
,NAME=S0003890
,Book Name=M-1577-BHATTDIPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection